# Bhū Sūktam

[(1) KYV TS 1-5-3-1 to 1-5-3-7
(2) Mantra Puṣhpam (*Ramakrishna Mission*)
(3) KYV TB 3-1-2-6]

ॐ भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा ।
ॐ bhūmir'bhūm'nād'
dyaur'variṇā (a)n'tarik'ṣham' mahit'vā ।

उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायाऽऽदधे ॥
upas'thē tē dēv'yaditē
(a)g'niman'nādaman'nād'yāyā (ā)dadhē ॥

आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः ।
ā (a)yaṅ' gau[fp]' pṛśh'nirak'ramīdasanan'mātaram'
punaḥa ।

पितरं च प्रयन्त्सुवः ॥
pitarañ' chap' prayant'suvaḥa ॥

त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये ।
trigm'śhad'dhāma vi rājati vāk'pataṅ'gāya śhiśh'riyē ।

प्रत्यस्य वह द्युभिः ॥
prat'yas'ya vahad' dyubhiḥi ॥

अस्य प्राणादपानत्यन्तश्चरति रोचना ।
as'yap' prāṇādapānat'yan'taśh'charati rōchanā ।

व्यख्यन् महिषः सुवः ॥
vyakh'yan' mahiṣhas' suvaḥa ॥

www.SaiVeda.net

यत् त्वां क्रुद्धः परोवप मन्युना यदवर्त्या ।
yat’ tvāāk’ krud’dha[fp]’
parōvapa man’yunā yadavar’tyā ।

सुकल्पमग्ने तत् तव पुनस्त्वोद्दीपयामसि ॥
sukal’pamag’nē tat’ tava punas’tvōd’dīpayāmasi ॥

यत् ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे ।
yat’ tē man’yuparōp’tas’ya pṛthivīmanu dadh’vasē ।

आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥
ādit’yā viśh’vē tad’dēvā vasavaśh’cha samābharan’ne ॥

मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ।
manōj’ jyōtir’juṣhatāmāj’yaṁ’ vit’chhin’nañ’
yaj’ñagm’ samiman’ dadhātu ।

बृहस्पतिस्तनुतामिमं नो विश्वे देवा , इह मादयन्ताम् ॥
bṛhas’patis’tanutāmiman’ nō viśh’vē dēvā ,
iha mādayan’tām ॥ (1)

मेदिनी देवी वसुन्धरा स्याद् वसुधा देवी वासवी ।
mēdinī dēvī vasun’dharās’ syād’
vasudhā dēvī vāsavīī ।

ब्रम्हवर्चसः पितृणाꣲ श्रोत्रं चक्षुर्मनः ।
bram’havar’chasa[fp]’ pitṛṇāgeśh’ śhrōt’rañ’
chak’shur’manaḥa ।

दे॒वी हि॑र॒ण्यग॑र्भि॒णी दे॒वी प्र॒सू॑व॒री ।
dēvī hiraṇ’yagar’bhiṇī dēvīp’ prasūvarī ।

सद॑ने स॒त्याय॑ने सीद ॥
sadanē sat’yāyanē sīda ॥

स॒मु॒द्रव॑ती सावि॒त्रीह॒ नो दे॒वी म॒ह्यङ्गी॑ ।
samud’ravatī sāvit’rīha nō dēvī mah’yaṅ’gī ।

म॒हीध॑र॒णी म॒होव्य॑थि॒ष्ठाः शृ॒ङ्गे शृ॒ङ्गे य॒ज्ञे य॑ज्ञे वि॒भी॒षि॒णी॑ ।
mahīdharaṇī mahōv’yathiṣh’ṭhāśh’ śhṛṅ’gē śhṛṅ’gē
yaj’ñē yaj’ñē vibhīṣhiṇī ।

इन्द्र॑पत्नी व्या॒पिनी॑ सु॒रस॑रि॒दि॒ह ।
in’drapat’nīv’ vyāpinī surasaridiha ।

वा॒यु॒मती॑ जल॒शय॑नी श्रि॒यं धा॒रा॒जा॑ स॒त्यन्धो॒ परि॑मेदि॒नी ।
vāyumatī jalaśhayanīśh’ śhriyan’ dhārājā
sat’yan’dhō parimēdinī ।

श्वो॒परि॑ धत्तं॒ परि॑ गाय ॥
śhvōpari dhat’tam’ pari gāya ॥

वि॒ष्णु॒पत्नीं॒ म॒हीं दे॒वीं मा॒ध॒वीं मा॑धव॒प्रि॒याम् ।
viṣh’ṇupat’nīm’ mahīn’ dēvīm’
mādhavīm’ mādhavap’riyām ।

ल॒क्ष्मीं॑ प्रि॒यस॑खीं दे॒वीं न॒मा॒म्य॒च्यु॑त व॒ल्लभाम् ॥
lak’ṣhmīm’ priyasakhīn’ dēvīn’
namām’yat’chyuta val’labhām ॥

www.Salvea.net

ध॒नु॒र्ध॒रायै॑ वि॒द्महे॑ सर्वसि॒द्ध्यै च॑ धीमहि ।
dhanur'dharāyai vid'mahē
sar'vasid'dhyai cha dhīmahi ।

तन्नो॑ धरा प्रचो॒दया॑त् ॥
tan'nō dharāp' prachōdayāāte ॥ (2)

म॒हीं दे॒वीं विष्णु॑पत्नीमज॒ूर्याम् ।
mahīn' dēvīṁ' viṣh'ṇupat'nīmajūr'yām ।

प्र॒तीचीमे॑नाꣳ ह॒विषा॑ यजामः ।
pratīchīmēnāgm' haviṣhā yajāmaḥa ।

त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे ।
trēdhā viṣh'ṇururugāyō vichak'ramē ।

म॒हीं दिवं॑ पृथि॒वीम॒न्तरि॑क्षम् ।
mahīn' divam' pṛthivīman'tarik'ṣham ।

तच्छ्रो॒णैति॒ श्रवं॑ , इ॒च्छमा॑ना ।
tat'chhrōṇaitiśh' śhrava , it'chhamānā ।

पुण्य॒ꣳ श्लोकं॑ यज॑मानाय कृण्वती ।
puṇ'yag'geśh' śhlōkañ' yajamānāya kṛṇ'vatī । (3)

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥



www.Sai Veda.net